International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(2): 01-03
© 2018 IJSR
www.anantaajournal.com
Received: 01-01-2018
Accepted: 02-02-2018

**एम्. वि. विश्वनाथ:**
Assistant Professor, Amrita Darshanam, Amrita Vishwa Vidyapeetham, Mysuru Campus, Karnataka, India

**Correspondence**
**एम्. वि. विश्वनाथ:**
Assistant Professor, Amrita Darshanam, Amrita Vishwa Vidyapeetham, Mysuru Campus, Karnataka, India

# काव्यात्मविचारे सहृदयश्लाघ्यत्वविमर्शः

## एम्. वि. विश्वनाथ

### भूमिका

इह जगति सर्वेषां प्राणिनां सत्ताप्रमाणकं तत्त्वं तावत् आत्मतत्त्वमेव। आत्मवतामेव प्रायो व्यवहारयोग्यत्वम्। अनात्मनस्तु काष्ठवत् सर्वत्र परीभावः स्यात्। सूक्ष्मतया विचारे तु, *यो यो वृत्तिमान् स स आत्मवान्* इति व्याप्तिं सम्भावयितुं शक्नुमः। करचरणाद्यङ्गसमवेतः शरीरी वा अशरीरी वा विद्यते चेत्, तर्हि स आत्मवान् भवेदेव। भौतविज्ञानिनः (Physicists) तु तावत्तत्र जगतः समुद्भवे परमाणून् कारणत्वेन व्यपदिशन्ति। शास्त्रादिषु तावत् तत् कारणम् आत्मतत्त्वमिति कथितम्। आत्मशब्दस्य हि बहवोऽर्थाः सन्ति। नानार्थकोशे तूक्तं- "आत्मा चित्ते धृतौ यत्ने धिषणायां कलेवरे। परमात्मनि जीवेऽर्के हुताशनसमीरयोः॥ स्वभावे" [1] इति । कस्यचित् पदार्थस्य स्वभावोऽपि, यथावद् वृत्तित्वमपि क्वचित् आत्मशब्देन व्यवह्रियते। एवं हि '*काव्यं श्रुतं, पठितं, गीतम्*' इत्यादिसार्वजनीनवाक्यप्रयोगात् काव्याख्यस्य कस्यचित् पदार्थविशेषस्य वृत्तित्वं ज्ञायते। यत्र यत्र वृत्तिमत्वं तत्र तत्र आत्मवत्त्वमिति व्याप्तेः, काव्यस्य आप्तवाक्यरूपशब्दप्रमाणेन वृत्तिमत्वे सिद्धे, तत् काव्यं नूनमेव आत्मवत् भवेत्। यच्च प्लेटो (Plato) प्रभृति पाश्चात्यविदुषां मतेन काव्यं निरर्थकं, तस्य प्रतिबिम्ब-प्रतिबिम्बनधर्मत्वात् [2] इति '*काव्यं न वर्तेत लोके*' इत्याकारकं मतं बहुधा श्रूयते, तथापि न तन्मतं श्रद्धेयं स्यात्, काव्यवृत्तत्वस्य, तत्प्रयोजनस्य, सार्वकालिकप्रस्तुतत्वस्य च शास्त्रेषु भूयसा प्रतिपादितत्वात् काव्यस्य वृत्तित्वं नितरां सिद्ध्यति। तस्मात् काव्यात्मविचारो न गगनकुसुमवत् निरर्थक इति काव्यात्मविचारस्य प्रस्तुत्वमपि तावत् सिद्ध्यति। प्रस्तुते च काव्यात्मविचारे, काव्यात्मा तावत् किमाकारकः प्राचीनैः प्रतिपादितः, तेषां बहुविधप्रतिपादनेषु संवादश्च कथं साध्यत इति जिज्ञासासमाधानमुद्दिश्य शोधपत्रमिदं तावत् विधीयते।

### काव्यात्मत्वविचारावश्यकता

शास्त्राणि प्रायो निखिलानि निगमागममूलानि भवन्ति। यथा गान्धर्ववेदस्य सङ्गीतशास्त्रस्य वा सामवेदो मूलं, तथैव काव्यशास्त्रस्यापि मूलं नाट्यवेदः। "नाट्याख्यं पञ्चमं वेदम्" [3] इत्यादि प्रोक्तत्वात्। अभिनवगुप्तास्तु "नाट्यवेदः नाट्यशास्त्रम् इति हि पर्यायौ" [4] इत्यकथयन्। ननु नट-नटनाभिनयविषयकं हि नाट्यशास्त्रम्; तद्धि न शब्दार्थमयस्य काव्यस्य मूलं भवेदिति चेत्- न। नटनाभिनयप्रतिपादनप्रवृत्तिमत्वे सत्यपि भगवता भरतमुनिनैवोक्तं स्वयं- "वाचि यत्नस्तु कर्तव्यो नाट्यस्यैषा तनूः स्मृता। अङ्गनेपथ्यसत्त्वानि वाक्यार्थं व्यञ्जयन्ति हि॥" [5] इति।

एवं नाट्यस्य वाक्प्राधान्यात् काव्यस्य च वाङ्मयत्वात् काव्यशास्त्रस्य मूलं नाट्यशास्त्रमिति निःसंशयं प्रतिभाति। काव्यात्मत्वविचारावश्यकताचिन्तने नाट्यशास्त्रोत्पत्तिः, आदिकाव्योत्पत्तिरिति प्रसङ्गद्वयस्यानुसन्धानमुचितमिति भाति। प्रसङ्गद्वयानुसन्धानेन काव्यशास्त्रमूलस्य नाट्यशास्त्रस्य चित्तं, धृतिः, यत्नः, धिषणा, स्वभावश्च ज्ञातुं शक्यते। एवमेवादिकाव्यस्योद्देशज्ञानमपि सम्भवेत्। एतेन काव्यात्मनः परिचयो भवेत्। ततः स्वत एवानायासेन काव्यात्मत्वविचारावश्यकता विदिता भवेदिति धिया विचार्यते।

नाट्यवेदाविर्भावात् प्राक्कालीनावस्थां स्वयं भरतमुनिरेवैवं प्रत्यपादयत्- "त्रेतायुगे संप्रवृत्ते मनोर्वैवस्वतस्य च। ग्राम्यधर्मे प्रवृत्ते तु कामलोभवशंगते। ईर्ष्याक्रोधादिसंमूढे लोके सुखितदुःखिते॥" [6] इति। एतादृशे काले सार्ववर्णिकस्य पञ्चमवेदस्य नाट्यशास्त्रस्य आविर्भावोऽभूत्। अत्र 'ग्राम्यधर्मे प्रवृत्ते' इत्यादिना तत्कालीनसमाजस्य यथावत् प्रतिपादनं प्रतीयत इत्यपि सम्भावयितुं शक्यते। अद्यापि लोके नाट्यशास्त्रोक्ता ग्राम्यधर्मादयः प्रचुरतरा दृश्यन्ते। य एते असुखावहा धर्माः प्रोक्ताः, तेषां समाधानार्थं सकलसद्गुणपरिपूर्णपुरुषजिज्ञासारूपेण हि तावदादिकाव्यस्य रामायणस्य आविर्भावोऽभवत् "कोऽन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान्" [7] इत्यादिना।

एवं काव्यशास्त्रागमस्य नाट्यवेदस्य, आदिकाव्यरामायणस्य च आविर्भावप्रसङ्गानुसन्धानात् मानवसमाजस्य हितमेव काव्यस्य चित्तं, समेषां मानवपशुतिर्यगादीनां व्यक्तित्वनिर्माणमेव काव्यस्य धिषणा, तदर्थमेव काव्यरूपो यत्नः, अयमेव काव्यस्य स्वभाव इति ज्ञायते। चित्त-धिषणा-यत्न-स्वभावानां तु आत्मशब्दार्थत्वात् मानवसमाजस्य हितमेव काव्यात्मा इत्यपि सम्भावयितुं शक्नुमः। अतः समाजहितार्थाय काव्यात्मत्वविचारो हि आवश्यक इति वक्तुं शक्यते।

**काव्यात्मनिर्णयः**

सर्वेऽर्था अप्याविर्भवादेव स्वकीयशास्त्रसहिता भवन्ति। तत एव शरीरमादावभूत् पश्चात् आत्मा संयुतोऽभवदिति नास्ति नियमः। किन्तु यदा कस्यचित् पदार्थस्य शरीरमुद्भूतं दृश्यते, तदा प्रभृत्येव तस्मिन्नात्मसंयोगः। यथा आम्रबीजे आम्रवृक्षस्य सद्भावः,आम्रवृक्षे च सर्वदा पारोक्ष्येण आम्रबीजस्य सद्भावो दृश्यते, तथैव काव्यनिर्माणादिक्षणादेव तस्य काव्यस्य काव्यात्मनावश्यं भवितव्यम्। आम्रवृक्षस्य बीजं हि स्वभावः। तस्माद् बीजं वृक्षात्मा। वृक्षो हि बीजस्य यत्नः, वृक्षो यत्नो यस्य बीजस्य, तद् बीजमपि वृक्षात्मा इति व्युत्पत्तेः। एवमेव काव्यात्मनोऽपि व्युत्पत्तिर्भवेत्। काव्यस्य स्वभावः, निदानं वा काव्यात्मा स्यात्। तन्निदानस्य यत्नः काव्यं स्यात्। अर्थात् काव्यं यत्नो यस्य निदानस्य, तन्निदानमपि काव्यात्मा भवेत्।

अत्र द्विप्रकारेण काव्यात्मनिर्णयः साध्यः। व्युत्पत्तिद्वयबलात् काव्यात्मानमपि द्विधा निर्णेतुं शक्नुमः। तद्यथा- काव्यं यत्नो यस्य स काव्यात्मा इति व्युत्पत्तिः। काव्यं शब्दार्थसाहित्यस्वरूपं यत्नः, प्रयत्नः यस्य कवेः, स कविः काव्यात्मा इति स्यात् इति प्रथमः प्रकारः। काव्यस्य स्वभावः, भावः, अर्थो वा इति काव्यस्यात्मा काव्यात्मेति व्युत्पत्या अर्थ एव काव्यात्मा भवेदिति द्वितीयः प्रकारः।

"अपारे काव्यसंसारे कविरेकः प्रजापतिः। यथास्मै रोचते विश्वं तथेदं परिवर्तते॥"[8] इत्युक्त्या कविः ब्रह्मा इति आरोपिता लक्ष्यते। अत्र कवेः ब्रह्मत्वारोपेण तस्य काव्यात्मत्वं सिद्ध्यति। "ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः" [9] इत्यादिकोशेन ब्रह्मण आत्मभूरिति पर्यायनाम ज्ञायते। आत्मभूरित्यस्य "आत्मना स्वयमेव भवति" [10] इति हि व्युत्पत्तिः। श्रुतिश्च तावदाज्ञापयति- "इदं सर्वमसृजत । तत्सृष्ट्वा । तदेवानुप्राविशत्" [11] इत्यादि। एतेन ब्रह्मणा सृष्टमिदं विश्वं तदात्मकं तन्मयं चास्तीति उक्तं भवति। अत एव तस्य विश्वात्मन् इत्यभिधानमुपपद्यते। विश्वं यस्य यत्नात् सृष्टं, स विश्वात्मा इति व्युत्पत्तिः स्यात्, आत्मनो यत्नार्थत्वात् इत्येतत् यथा ब्रह्मणि संगच्छते, तद्वदेव कवेः ब्रह्मत्वारोपात् कविः "सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन। यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः॥" [12] इत्युक्त्या प्रत्यभिज्ञाताभ्यां शब्दार्थाभ्यं काव्यं निर्माति इति तस्मिन् अपि विश्वात्मत्वं सङ्गच्छते शब्दमयत्वादस्य विश्वस्य। काव्ये तावत् सर्वत्र कवेरन्तर्गता एव भावा भवन्ति। किञ्च त एव भावाः सामाजिकैः हृदयसंवादमहिम्ना तन्मयीक्रियन्ते। अतो विश्वात्मन् इति ब्रह्मणि यथा तथैव काव्यात्मन् इति शब्दः कवावपि युज्यते। तस्मात् काव्यात्मा कविरिति सिद्ध्यति।

एवमेव, यथा सृष्ट्यादौ "सोऽकामयत। बहुस्यां प्रजायेयेति" [13] इति वेदवाक्योक्तवत्, "कामोऽकार्षीन्नमो नमः। कामः कर्ता नाहं कर्ता, कामः कारयिता नाहं कारयिता"[14] इत्यादिवेदमन्त्रैः ब्रह्मणा सृज्यमानेऽपि विश्वस्मिन् यथा तद्वतः काम एव कर्तृत्वात् प्रधानः समभवत् तथैव कविना एव निर्मीयमाणे काव्येऽपि क्वचित् कवेरन्तर्गतो भाव एव प्रधानः स्यादिति वक्तुं शक्यते। "आत्मभूर्ना विधौ कामे" [15] इति नानार्थकोशोक्त्या यथा आत्मभूरिति शब्दः कामेऽप्यन्वेति, तथैव काव्यात्मशब्दोऽपि कवेरन्तर्गते भावेऽन्वेतीति वक्तुं शक्यते। अत एव ध्वनिकारोऽपि "काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा। क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥" [16] इत्यकथयत्। योऽयं भावः,स एव अर्थ इति, क्वचित् स्थायीभाव इति च व्यवह्रियते। किञ्च अयमेवार्थः अभिव्यक्तः सन् रस इति, ध्वनिरिति च व्यपदिश्यते। यथा "योऽर्थो हृदयसंवादी तस्य भावो रसोद्भवः। शरीरं व्याप्यते तेन शुष्कं काष्ठमिवाग्निना॥"[17] इति भरतमुनिवचनं हि अर्थमुखेनैव रसोद्भूतिं प्रत्यपादयत्। "व्यक्तः स तैर्विभावाद्यैः: स्थायीभावो रसः स्मृतः"[18] इति मम्मटोक्तिस्तु भावमुखेन रसोद्भूतिमकथयत्।

ध्वनिरिति व्यवहारस्तु ध्वननव्यापारबलात् प्रवृत्तः। रस इति कथने केवलं रसस्यैव ग्रहणं स्यात्। रसस्य यद्यपि सर्वदा व्यङ्ग्यत्वमिति स्थितं, तथापि क्वचित् वस्त्वलङ्कारा अपि व्यञ्जनाव्यापारेण ध्वननव्यापारेण वा प्रतीयन्त इति, क्वचिच्च वाच्या अपि भवेयुरिति तान् सर्वान् संग्रहीतुं ध्वनिरिति व्यपदेशः कृतः। अग्निपुराणे तु यदुक्तं "वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्" [19] इति, तदेव ध्वनितं ध्वनिकृता। स्फुटीकृतं च तावत् अभिनवगुप्तपादैः "तेन रस एव वस्तुत आत्मा, वस्त्वलङ्कारध्वनी तु सर्वथा रसं प्रति पर्यवस्येते इति वाच्यादुत्कृष्टौ ताविति अभिप्रायेण 'ध्वनिः काव्यस्यात्मेति सामान्येनोक्तम्" [20] इति। अतः काव्यस्यात्मा ध्वनिरित्युक्तवत आनन्दवर्धनाचार्यस्यापि तात्पर्यं रसध्वनावेवासीदिति गम्यते। ध्वननव्यापारस्य वस्त्वलङ्कारप्रतीतिसद्भावेऽपि तथा न व्यवहार इति अभिनवगुप्ता ऊचुः "सर्वत्रापि ध्वननसद्भावेऽपि न तथा व्यवहारः। आत्मसद्भावेऽपि क्वचिदेव जीवव्यवहारः" [21] इति। तदेवं व्युत्पत्तिद्वयबलात् प्रकारद्वयेन काव्यात्मा निर्णेतुं शक्य इति प्रतिपादितम्।

**सहृदयश्लाघ्यत्वम्**

प्राक्प्रतिपादितप्रकारद्वयेऽपि काव्यात्मनि सहृदयश्लाघ्यत्वं सम्भावयितुं शक्नुमः। यद्यपि काव्यं कवियत्नसंपाद्यम् अतः कविः काव्यात्मा इति सत्यम्, तथापि सर्वोऽपि यत्नो विधीयमानत्वात् यत्किञ्चिदुद्देशेनावश्यं भाव्यः। तस्मात् काव्यं विदधानः कविः कव्यात्मा तदैव स्यात्, यदा तस्य काव्यविधानरूपयत्नस्य उद्देशो निर्णीयते। स चोद्देशः सहृदयः। सहृदयमुद्दिश्यैव यद्यपि कविना काव्यं न विधीयते, तथापि काव्यस्य काव्यत्वं तु तावत् सहृदयनिष्ठमेव भवेत्। तस्मात् सहृदयः काव्यरूपकविविधानस्योद्देश इति वक्तुं शक्नुमः। 'श्लाघा' शब्दस्य तु प्रशंसा, परिचर्या, अभिलाप इत्यर्थाः शब्दकल्पद्रुमे प्रोक्ताः। [22] श्लाघायोग्यास्तु श्लाघ्यपदव्यपदेश्या भवन्ति। सहृदयैः श्लाघ्यं, सहृदयश्लाघ्यमिति तत् काव्यस्य विशेषणं स्यात्। सहृदयश्लाघ्यत्वं च पुनः न केवलं काव्ये अपि तु कवावपि सम्भवतीति प्रथमप्रकारस्य कविरेव काव्यमित्येतत्प्रकारककाव्यव्युत्पत्तेः सहृदयश्लाघ्यत्वं साधयितुं शक्यते।

द्वितीयप्रकारे तु योऽर्थो भावो वा रसत्वमाप्नुयात्, तत्र हृदयसंवादः कारणं भवेत्। अत एव भरतमुनिना हृदयसंवादस्य प्राधान्यं दर्शयता हृदयसंवादो विशेषणत्वेन तस्मिन् काव्यात्मभूतेऽर्थे न्यवेशितः "योऽर्थो हृदायसंवादी तस्य भावो रसोद्भवः" [23] इति। अभिनवगुप्तपादा अपि "तथाभूतविभावतदुत्थानुभावचर्वणया हृदयसंवादतन्मयीभवनक्रमादास्वाद्यमानतां प्रतिपन्नो रसः"[24] इति व्याख्यामासुः। बालप्रियाकारास्त्वस्याः पङ्क्तेः व्याख्यायामितोऽपि स्फुटतरं प्रत्यपादयन् "सहृदयस्यादौ हृदयसंवादः, ततः तन्मयीभावलाभः, तदुत्तरमास्वादः" [25] इति।

तदेवमादौ कविहृदयनिष्ठो अर्थो भावो वा काव्यरूपेण निबध्यमानः सन् विभावादिभिः चर्वणाविषयो भवति। चर्वणया हृदयसंवादः, ततः तन्मयता, ततश्चास्वद्यता इति क्रमः। अत्र तावत् रसास्वादननिदानभूतो हृदयसंवादः सापेक्षः। हृदयस्य हृदयेन वा संवाद इत्युक्ते, कस्य केनेति स्वाभाविकी अपेक्षा स्यात्। सा चापेक्षा सहृदयनिवेशनेन पूर्यते। कविहृदयनिष्ठस्य काव्यरूपतां च प्राप्तस्य तदर्थस्य भावस्य वा "सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्" [26] इति सद्यःपरनिर्वृतिरूपकाव्यप्रयोजनाभिधायककारिकांशविवृतिभूतकाव्य प्रकाशकृद्वचनबलात् रसास्वादनोद्भवानन्दस्य

काव्यपरमप्रयोजनत्वात्, तत्प्रयोजनस्य च हृदयसंवादावश्यकत्वात्, हृदयसंवादस्य च सहृदयापेक्षत्वात् सहृदयनिवेशो मौलिकः प्रतिभाति। सहृदयहृदयसंवादवत्वे सति श्लाघ्यत्वं सहृदयश्लाघ्यत्वम्। तत्र श्लाघ्यत्वस्यावश्यकताजिज्ञासायामिदमुच्यते यत् हृदयसंवाद-तन्मयीभवन-आस्वादनेत्येतत्परम्परायां तन्मयीभावस्तावत् श्लाघ्यताभावे न सम्भवतीति हेतोः श्लाघ्यत्वमत्यवश्यम्। तथा च यदेतदास्वादनपरम्परा काव्यस्य प्राणप्रयोजनभूता विद्यते, सा प्रकारान्तरेणापि वक्तुं शक्यते। प्रयोजनेन सहाभिधानं काव्यात्मनि सर्वथा युज्यत इति भासते। तस्मात् अश्लाघ्ये तन्मयताभावात् श्लाघ्यत्वे सत्येव तन्मयतासिद्धेः, सहृदयश्लाघ्यत्वं द्वितीयेऽपि काव्यात्मप्रकारे सिद्ध्यति।

## उपसंहार

तदित्थं द्विविधेऽपि काव्यात्मप्रकारे सहृदयश्लाघ्यत्वं वक्तुं शक्नुमः। अत एव ध्वनिकारेण
"योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः। वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ॥"[27] इत्यत्र काव्यात्मभूतस्य अर्थस्य सहृदयश्लाघ्यत्वं विशेषणत्वेन विन्यस्तम्। अभिनवगुप्तास्तु तमेव दृढीकृतवन्तो "स एक एवार्थो द्विशाखतया विवेकिभिर्विभागबुद्ध्या विभज्यते। तथा हि - तुल्येऽर्थरूपत्वे किमिति कस्मैचिदेव सहृदयाः श्लाघन्ते। तद् भवितव्यं तत्र केनचिद् विशेषेण। यो विशेषः स प्रतीयमानभागो विवेकिभिर्विशेषहेतुत्वात् आत्मेति व्यवस्थाप्यते" [28] इत्यादिना। किञ्च "वाचामेव प्रसादेन लोकयात्रा प्रवर्तते" [29] इति दण्डिनो वचनं काव्यस्य लोकोपदेशरूपं हृदयभूतमर्थं प्रति यस्य वाक्तत्वस्य प्रसन्नतामकथयत्, तद्धि वाक्तत्वं किं स्वरूपं काव्यशास्त्रे इति चेदुक्तमभिनवगुप्तैः "सरस्वत्यास्तत्वं कविसहृदयाख्यं विजयते" [30] इति। कविसहृदयमिति वचनेन न केवलं कवेः सहृदयसहभावोऽपेक्षितः, किन्तु कवेः कविहृदयनिष्ठस्य चार्थस्य सहृदयैः श्लाघ्यत्वमपि निर्विशङ्कमपेक्षितं भवति।
अतः प्रकारद्वयेऽपि काव्यात्मनि सहृदयश्लाघ्यत्वस्य सर्वथा प्राधान्यात् क्वचित् संवादमतिना विमृश्यमाणे सति, "प्रायः ससंवादिन्य एव मेधाविनां बुद्धयः" [31] इत्युक्तत्वात् प्रकारद्वयस्यापि काव्यात्मनः अन्यसादृश्यरूपो हि संवादः सम्भवेत्। सहृदयश्लाघ्यत्वमेव क्वचित् अन्यसादृश्यं भवेत्। तस्मात् सहृदयश्लाघ्यत्वमेव काव्यात्मत्वं स्यात् इति सम्भावयितुं शक्नुमः। तथा हि, सहृदयश्लाघ्यत्वे काव्यात्मत्वेन स्वीकृते, काव्यस्य प्रधानं समाजहिताख्यमुद्देशमपि सिद्ध्येत। सहृदयश्लाघ्यत्वं चेत् काव्यात्मत्वं तदा काव्यं सहृदयश्लाघ्यं स्यात्, तदनुसन्धानेन समाजोऽपि सहृदयः स्यादिति सम्भाव्य काव्यात्मत्वविचारे सहृदयश्लाघ्यत्वं विमर्शमर्हतीति सम्भावनाफलवदिदं यथामति यथाज्ञानं शोधपत्रेऽस्मिन् प्रतिपादितमिति दिक्।

## संदर्भ ग्रन्थ सूची


1. अमरकोशे १-३-२९
2. Poetry is an imitation of imitation.
3. नाट्यशास्त्रे १-१५
4. नाट्यशास्त्रे १-१५,अभिनवभारत्याम्
5. नाट्यशास्त्रे १४-२
6. नाट्यशास्त्रम्१-६,७
7. वाल्मीकिरामायणे १-१-२
8. ध्व्न्यालोके ३-२४
9. अमरकोशे १-१-१६
10. अमरकोशे १-१-१६, रामाश्रमीव्याख्यायां
11. तैत्तरीयोपनिषदि, ब्रह्मानन्दवल्लयाम्
12. ध्वन्यालोके १-७
13. तैत्तरीयोपनिषदि, ब्रह्मानन्दवल्ल्याम्
14. यजुर्वेदे
15. मेदिनीकोशे १०७-११
16. ध्वन्यालोके १-६
17. नाट्यशास्त्रे ७-७
18. काव्यप्रकाशे ४-४
19. अग्निपुराणे इति साहित्यदर्पणे १-३
20. लोचनटीकायाम् १-४, पृ.सं.-८५
21. लोचनटीकायाम् १-५, पृ.सं.-८८
22. शब्दकल्पद्रुमे
23. नाट्यशास्त्रे ७-७
24. लोचनटीकायाम् १-४, पृ.सं.-८५
25. बालप्रियाटीकायाम् पृ.सं.-८५
26. काव्यप्रकाशे १-२
27. ध्वन्यालोके १-३
28. लोचनटीकायाम् १-२, पृ.सं.-४४
29. काव्यादर्शे १-३
30. लोचनटीकायाम् १-१
31. ध्वन्यालोके ४-११